## क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्। (१०४/३६२३)

[1]स्वरितः इति वर्तते। क्षिया आचारभेदः, आशीः प्रार्थनाविशेषः, शब्देन व्यापारणं प्रैषः, एतेषु गम्यमानेषु तिङन्तमाकाङक्षं यत् तस्य [2]स्वरितः प्लुतो भवति। आकाङक्षति इति आकाङक्षम्, तिङन्तमुत्तरपदमाकाङक्षति इत्यर्थः। क्षियायां तावत् – स्वयं[3] रथेन याति३, उपाध्यायं पदातिं गमयति इति। स्वयम् ओदनं ह भुङक्ते३, उपाध्यायं सक्तून् पाययति। पूर्वमत्र तिङन्तमुत्तरपदम् आकाङक्षति इति साकाङक्षं भवति। आशिषि – [4]सुतांश्च लप्सीष्ट३ धनं च तात। छन्दोऽध्येषीष्ट३ व्याकरणं च भद्र। प्रैषे – कटं कुरु३ ग्रामं च गच्छ। यवान् लुनीहि३ सक्तूंश्च पिब। आकाङक्षम् इति किम्? दीर्घं ते आयुरस्तु। अग्नीन् विहर॥

## अनन्त्यस्यापि प्रश्नाख्यानयोः। (१०५/३६२४)

पदस्य इति वर्तते, स्वरितम् इति च। अनन्त्यस्यापि अन्त्यस्यापि पदस्य टेः प्लुतो भवति प्रश्ने आख्याने च। अगम३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ, पटा३उ। सर्वेषामेव पदानामेष स्वरितः प्लुतः। अन्त्यस्य 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' (८.२.१००/३६१९) इति अनुदात्तोऽपि पक्षे भवति। आख्याने – अगम३ः पूर्वा३न् ग्रामा३न् भो३ः॥

## प्लुतावैच इदुतौ। (१०६/३६२५)

[5]दूराद्धूतादिषु प्लुतो विहितः। [6]तत्र ऐचः प्लुतप्रसङ्गे तदवयवभूतौ इदुतौ [7]प्लुतौ। ऐ३तिकायन। औ३पमन्यव। अत्र यदैवर्णोवर्णयोः अवर्णस्य च [8]समविभागः, तदा इदुतौ द्विमात्रावनेन प्लुतौ क्रियेते। प्लुतौ इति [9]हि क्रियानिमित्तोऽयं व्यपदेशः। इदुतौ प्लवेते [10]वृद्धिं गच्छतः इत्यर्थः। तावती च सा प्लुतिर्भवति यया तावैचौ त्रिमात्रौ सम्पद्येते। यदा तु अर्धमात्रा अवर्णस्य अध्यर्धमात्रा इवर्णोवर्णयोः, तदा तौ अर्धतृतीयमात्रौ क्रियेते इति। [11]भाष्ये तु उक्तम्, 'इष्यते एव चतुर्मात्रः प्लुतः' (म.भा. ३.४२१) इति। तत् कथम्? [12]समप्रविभागपक्षे इदुतोरनेन त्रिमात्रः प्लुतो [13]विधीयते[14]॥

## एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ। (१०७/३६२६)

एचोऽप्रगृह्यस्य [15]अदूराद्धूते [16]प्लुतविषयस्य अर्धस्या[17]कारः आदेशो भवति, स च प्लुतः,[18] उत्तरस्ये[19]–कारोकारावादेशौ भवतः। विषयपरिगणनं कर्तव्यम् —

[९३२] प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम्। (म.भा. ३.४२१)

---

1. वाक्यमिदं नास्ति इ. 2. टेः इत्यधिकम् क. 3. ह इत्यधिकम् क. 4. पुत्रांश्च क.ड. 5. वाक्यमिदं नास्ति इ.ह. 6. तत्रैव एचः प्लुतः प्रसङ्गे क.इ, एचः प्लुतिः प्रसङ्गे ह. 7. प्लवते क.ड.ह.ब. 8. समप्रविभागः क.इ.ह.ब. 9. हि नास्ति क. 10. वर्धेते ह. 11. भाष्योक्तमिष्यते क. 12. समप्रविभागे पक्षे क. इ.ब. 13. भवति क. 14. इति इत्यधिकम् इ. 15. दूराद्धूतादिवर्जिते इ. ह. ड. 16. प्लुतविषये क. इ. ह. 17. अकारमात्रस्य क. 18. भवति इत्यधिकम् क.इ.ब. 19. तु अर्धस्य इत्यधिकम् क.इ.ह.ब.